CAMBRIDGE INTERNATIONAL EXAMINATIONS
**General Certificate of Education Advanced Level**

**SANSKRIT** **9606/1**

SPECIMEN PAPER 1. Prescribed Texts

Additional materials:
Answer paper

**TIME** $2^1/_2$ hours

**INSTRUCTIONS TO CANDIDATES**

Write your name, Centre number and candidate number in the spaces provided on the separate answer paper.

Answer all questions.

Write your answers on the answer paper provided.

If you use more than one sheet of paper, fasten the sheets together.

**INFORMATION FOR CANDIDATES**

The maximum number of marks for each question is shown in brackets [ ] at the end of each question.

**This question paper consists of 9 printed pages.**


© UCLES 2010+

**1** *Buddhacarita of Aśvaghoṣa*

(i) इत्येवमुक्ते चलितः स किंचिद्राजात्मजः सूतमिदं बभाषे।
किमेष दोषो भविता ममापीत्यस्मै ततः सारथिरभ्युवाच॥

आयुष्मतोऽप्येष वयःप्रकर्षो निःसंशयं कालवशेन भावी।
एवं जरां रूपविनाशयित्रीं जानाति चैवेच्छति चैव लोकः॥

ततः स पूर्वाशयशुद्धबुद्धि-
र्विस्तीर्णकल्पाचितपुण्यकर्मा।
श्रुत्वा जरां संविविजे महात्मा
महाशनेर्घोषमिवान्तिके गौः॥

निःश्वस्य दीर्घं स्वशिरः प्रकम्प्य तस्मिंश्च जीर्णे विनिवेश्य चक्षुः।
तां चैव दृष्ट्वा जनतां सहर्षां वाक्यं स संविग्न इदं जगाद॥

एवं जरा हन्ति च निर्विशेषं स्मृतिं च रूपं च पराक्रमं च।
न चैव संवेगमुपैति लोकः प्रत्यक्षतोऽपीदृशमीक्षमाणः॥

एवं गते सूत निवर्तयाश्वान् शीघ्रं गृहाण्येव भवान्प्रयातु।
उद्यानभूमौ हि कुतो रतिर्मे जराभये चेतसि वर्तमाने॥

Book 3, vv 32 to 37

**(a)** Translate lines 1 and 2, *‘ityevamukte . . . sārathirabhyuvāca’.* [4]

**(b)** Translate and explain:
**(i)** *‘kālavaśena’* (line 3)
**(ii)** *‘mahāśaneḥ’* (line 8)
**(iii)** *‘jarābhaye’* (line 14) [3]

**(c)** What is the occasion described? What did Buddha see? What effect did it have on him? [3]

**(ii)** उपवासविधीन्नैकान् कुर्वन्नरदुराचरान् ।
वर्षाणि षट् शमप्रेप्सुरकरोत्कार्श्यमात्मनः ॥

अन्नकालेषु चैकैकैः स कोलतिलतण्डुलैः ।
अपारपारसंसारपारं प्रेप्सुरपारयत् ॥

देहादपचयस्तेन तपसा तस्य यः कृतः ।
स एवोपचयो भूयस्तेजसास्य कृतोऽभवत् ॥

कृशोऽप्यकृशकीर्तिश्रीर्ह्लादं चक्रेऽन्यचक्षुषाम् ।
कुमुदानामिव शरच्छुक्लपक्षादिचन्द्रमाः ॥

त्वगस्थिशेषो निःशेषैर्मेदः पिशितशोणितैः ।
क्षीणोऽप्यक्षीणगाम्भीर्यः समुद्र इव स व्यभात् ॥

Book 12, vv 95 to 99

**(a)** Translate lines 1 and 2, *'upavāsavidhīn . . . ātmanaḥ'*. [2]

**(b)** Translate and explain:
**(i)** *'annakāleṣu'* (line 3)
**(ii)** *'apārapārasaṃsārapāram'* (line 4) [3]

**(c)** Translate lines 5 and 6, *'dehādapacayastena . . . kṛto'bhavat'.* [2]

**(d)** What is the philosophy depicted poetically in this passage? Why did Buddha eventually turn away from this approach? [3]

[Total: 10 x 2 = 20 marks]

**[Turn over**

**2** *Manu*

**(i)**
आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ॥

ततः स्वयंभूर्भगवानव्यक्तो व्यञ्जयन्निदम् ।
महाभूतादि वृत्तौजाः प्रादुरासीत्तमोनुदः ॥

योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः ।
सर्वभूतमयोऽचिन्त्यः स एव स्वयमुद्बभौ ॥

सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः ।
अप एव ससर्जादौ तासु बीजमवासृजत् ॥

तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् ।
तस्मिञ्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः ॥

Book 1, vv 5 to 9

**(a)** Translate lines 1 and 2, *'āsīdidaṃ . . . sarvataḥ'.* [3]

**(b)** Translate and state the type of compound:
**(i)** *'mahābhūtādi'* (line 4)
**(ii)** *'atīndriyagrāhyaḥ'* (line 5)
**(iii)** *'sarvalokapitāmahaḥ* (line 10) [3]

**(c)** Scan lines 6 and 7, *'sarvabhūtamayo . . . prajāḥ'.* [4]

**(ii)** तस्यार्थे सर्वभूतानां गोप्तारं धर्ममात्मजम् ।
ब्रह्मतेजोमयं दण्डमसृजत्पूर्वमीश्वरः ॥

तस्य सर्वाणि भूतानि स्थावराणि चराणि च ।
भयाद्भोगाय कल्पन्ते स्वधर्मान्न चलन्ति च ॥

तं देशकालौ शक्तिं च विद्यां चावेक्ष्य तत्त्वतः ।
यथार्हतः संप्रणयेन्नरेष्वन्यायवर्तिषु ॥

दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति ।
दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः ॥

समीक्ष्य स धृतः सम्यक्सर्वा रञ्जयति प्रजाः ।
असमीक्ष्य प्रणीतस्तु विनाशयति सर्वतः ॥

यदि न प्रणयेद्राजा दण्डं दण्ड्येष्वतन्द्रितः ।
शूले मत्स्यानिवापक्ष्यन्दुर्बलान्बलवत्तराः ॥

Book 7, vv 14 to 16 and 18 to 20

**(a)** Translate lines 5 to 8, *'taṃ deśakālau . . . vidurbudhāḥ'.* [5]

**(b)** Translate and explain:
**(i)** *'brahmatejomayam'* (line 2)
**(ii)** *'svadharmān'* (line 4) [3]

**(c)** If the king were not to wield the rod of punishment, what would be the consequence? (line 12) [2]

[ Total: 10 x 2 = 20 marks ]

**[Turn over**

**3** *Upaniṣads*

**(i)**

अणोरणीयान्महतो महीया-
    नात्माऽस्य जन्तोर्निहितो गुहायाम्।
तमक्रतुः पश्यति वीतशोको
    धातुप्रसादान्महिमानमात्मनः॥

अग्निर्यथैको भुवनं प्रविष्टो
    रूपं रूपं प्रतिरूपो बभूव।
एकस्तथा सर्वभूतान्तरात्मा
    रूपं रूपं प्रतिरूपो बहिश्च॥

वायुर्यथैको भुवनं प्रविष्टो
    रूपं रूपं प्रतिरूपो बभूव।
एकस्तथा सर्वभूतान्तरात्मा
    रूपं रूपं प्रतिरूपो बहिश्च॥

सूर्यो यथा सर्वलोकस्य चक्षु-
    र्न लिप्यते चाक्षुषैर्बाह्यदोषैः।
एकस्तथा सर्वभूतान्तरात्मा
    न लिप्यते लोकदुःखेन बाह्यः॥

Kaṭha Up. 1:2:20, 2:2:9–11

**(a)** Translate and state the type of compound:
**(i)** *'vītaśokaḥ'* (line 3);
**(ii)** *'sarvabhūtāntarātmā'* (line 7) [3]

**(b)** Translate lines 9 to 12, *'vāyuryathaiko . . . bahiśca'.* [5]

**(c)** Name four qualities of the supreme Self illustrated in the first and last verses above (lines 1 to 4, and 13 to 16). [2]

**(ii)** जनकं ह वैदेहं याज्ञवल्क्यो जगाम ; स मेने न वदिष्य इति ; अथ ह यज्जनकश्च वैदेहो याज्ञवल्क्यश्चाग्निहोत्रे समूदाते, तस्मै ह याज्ञवल्क्यो वरं ददौ ; स ह काम-प्रश्नमेव वव्रे, तं हास्मै ददौ ; तं ह सम्राडेव पूर्वं पप्रच्छ ॥

याज्ञवल्क्य किंज्योतिरयं पुरुष इति। आदित्यज्योतिः सम्राडिति होवाच, आदित्येनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति ; एवमेवैतद्याज्ञवल्क्य ॥

अस्तमित आदित्ये याज्ञवल्क्य किंज्योतिरेवायं पुरुष इति ; चन्द्रमा एवास्य ज्योतिर्भवतीति, चन्द्रमसैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति ; एवमेवैतद्याज्ञवल्क्य ॥

Bṛhadāraṇyaka Up. 4:3: 1 to 3

**(a)** Translate lines 1 to 4, *'janakaṃ ha . . . pūrvaṃ papraccha'.* [5]

**(b)** Paraphrase the sequence presented in the Upaniṣad in the above verses and those that follow, stating how the question is finally answered. [5]

[Total: 10 x 2 = 20 marks]

**4** *Bhagavad Gītā and Śaṅkara's Commentary*

(i) मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव॥
रसोऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययोः।
प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु॥
पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ।
जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु॥
बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम्।
बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम्॥
बलं बलवतां चाहं कामरागविवर्जितम्।
धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ॥
ये चैव सात्त्विका भावा राजसास्तामसाश्च ये।
मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि॥

Chap. 7, vv 7 to 12

**(a)** Translate lines 7 and 8, *'bījaṃ māṃ . . . tejasvinām aham'*. [2]

**(b)** Translate and explain:
**(i)** *'kāmarāgavivarjitam'* (line 9)
**(ii)** *'dharmāviruddhaḥ'* (line 10)
**(iii)** *'bharatarṣabha'* (line 10) [3]

**(c)** Translate lines 11 and 12, *'ye . . . mayi'*. [2]

**(d)** In your own words, what is the overall point being made in these verses? [3]

**(ii)** चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥

चंचलमिति। चंचलं हि मनः। कृष्णेति कृषतेर्विलेखनार्थस्य रूपं, भक्तजनपापादिदोषाकर्षणात्कृष्णः। हि यस्मान्मनः चंचलं न केवलमत्यर्थं चंचलं, प्रमाथि च प्रमथनशीलं, प्रमथ्नाति शरीरमिंद्रियाणि च विक्षिपत्सत् परवशीकरोति। किंच बलवत् प्रबलं न केनचिन्नियन्तुं शक्यं दुर्निवारत्वात्। किंच दृढं तंतुनागवदच्छेद्यम्। तस्यैवंभूतस्य मनसोऽहं निग्रहं निरोधं मन्ये वायोरिव। यथा वायोर्दुष्करो निग्रहस्ततोऽपि मनसो दुष्करं मन्ये इत्यभिप्रायः॥

Śaṅkarabhāṣya on Bhagavad Gītā, Chap. 6, v 34

**(a)** Translate *'bhaktajanapāpādidoṣākarṣaṇāt'* (line 4). [2]

**(b)** Translate lines 7 to 10, *'kiṃca dṛḍhaṃ . . . ityabhiprāyaḥ'.* [5]

**(c)** Explain the derivation given by Śaṅkara in line 3, and say how this is typical of the commentarial style. [3]

[Total: 10 x 2 = 20 marks]

END